॥ अथ षट्पंचाशत्तमोऽध्याय: ॥ Chapter-56

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ आर्यचिण्डीमिति श्रुताम् ॥
यां दृष्ट्वा मानवो भक्त्या न दु:खं प्राप्नुयात् क्वचित् ॥ १

पुरा सोमश्रवा नाम ब्राह्मणो गौतमान्वय: ॥
पत्नीं स रथमारोप्य पुत्रंचापि द्विवार्षिकम् ॥ २

यज्ञकूपं[1] गत: स्नातुं शिवरात्रीदिने शुभे ॥
गृहं प्रतिनिवृत्तस्य राजंस्तस्य द्विजन्मन: ॥ ३

मार्गे दृष्ट्वाथ बहूनुष्ट्रान्त्रस्तौ रथवृषाविमौ ॥
त्रस्यतोरतिवेगेन तयोर्निपतितो रथात् ॥ ४

पुत्र: सुप्तो जनन्या च न ज्ञात: स तदा पतन् ॥
ततस्तौ स्वगृहं प्राप्तौ हृष्टतुष्टौ रथेन वै ॥ ५

धीरा तज्जननी[2] यावच्छ्यानं पुत्रमञ्जसा ॥
आस्ते पिधानवस्त्रं वै दृश्यते न तु पुत्रकम् ॥ ६

उद्विग्नाथ द्विजस्याग्रे कथयामास शंकिता ॥
नास्ति पुत्रो रथे सुप्त: शीघ्रं कुत्रापि वीक्ष्यताम् ॥ ७

-o-

१ ए यज्ञ कुपं
२ ए ते जननी

ततः सोमश्रवाः शिष्यान् प्रेषयामास वीक्षितुम् ।
स्वयं च सह पत्न्या वै द्विजं द्रष्टुं प्रचक्रमे ॥ ८

रथ्या रथ्यान्तरालांश्च पणमार्गांश्च चत्वरान् ॥
वीक्षन्ते सुहृदः सर्वे न च पश्यन्ति पुत्रकम् ॥ ९

स च बालः प्रबुद्धः सन् क्षिप्रं निपतितो रथात् ॥
रथ्यान्तरेषु विचरन् मार्गभ्रष्टो बभूव ह ॥ १०

काकपक्षधरो[1] बालो मातर्मातरिति ब्रुवन् ॥
स्थित्वा रथ्यासु रथ्यासु रोदिति प्रचुरं तदा ॥ ११

तस्मिन् सागरसंकाशे नगरे कोऽपि कुत्रचित् ॥
न ज्ञायते गजेन्द्रोऽपि भ्रष्टो बालस्य का कथा ॥ १२

प्रवृत्ता रजनी राजन्नथ ध्वान्ताकुला भृशम् ॥
देवालयगर्भेषु प्रकाशो दीपकैः कृतः ॥ १३

चत्वरेषु च सर्वेषु पान्थदीपैः समन्ततः ॥
आपणालयरथ्यासु दीपमाला सहस्रशः ॥ १४

-०-

१ ए काकपक्षको

गृहेषु च गृहस्थानां देवानामालयेषु च ।।
आपणालयवीथीषु चत्वरेषु[1] च सर्वतः ।। १५

दीपकैर्नैहतं राजन् बहुलास्वपि रात्रिषु ।।
लभते तत्र न स्थातुं समूहः स्तेयकृन नृणाम्[2] ।। १६

ततः सोमश्रवा विप्रः शोकातुरमना[3] जनान् ।।
लप्स्यते[4] मम बालोऽयमिति पृच्छंश्चचार ह ।। १७

अथ पृच्छति यस्तत्र का ते माता पिता च कः ।।
अनभिज्ञः स संज्ञायां न ब्रूतेऽ केवलं रुदन् ।। १८

अदृश्यमूर्तिः सर्वेषां जनानामुत्तरप्रदा ।।
आर्याचण्डीति जल्पन्ती सह भ्राम्यति चण्डिका ।। १९

अथ कश्चिद्द्विजो विद्वान् तत्रागतः कृपाधनः ।।
तमपृच्छदहो बाल का ते माता पिता च कः ।। २०

आर्याचंडीति शुश्राव तस्य विप्रस्य भाषितम् ।।
ततस्तुष्टाव तां देवीमार्यां लोकस्य चंडिकाम् ।। २१

-o-

१ बी आपणालयवीथीषु दीपकेषु च सर्वतः ।।
२ बी लभते न परिस्थातु मसूयेव सतां हृदि ।। घ ई तमः
४ ३ बी लप्स्यते

३ ४ ए नौ

ब्राह्मण उवाच : आर्या त्वं जगतां देवि बालस्यास्य न केवलम् ।।
पिता च त्वं परित्राणात् बन्धुस्त्वमसि देहिनाम् ।। २२

श्रीमालमिदमेतावत्प्रशस्यं भुवनत्रये ।।
यत्र त्वं देवी चरसि प्रत्यक्षैव[1] पुरांगना ।। २३

त्वम्दक्ताय न भीर्देवि कुतोपि भुवि जायते ।।
अन्यत्रापि विशेषेण श्रीमालेऽत्र त्वमीश्वरी ।। २४

प्रवृत्ता रजनी मातध्वान्तेन जगदावृतम् ।।
बालस्य पितरस्तस्य[2] सांप्रतं नाशमेष्यतः ।। २५

प्रसीद पितरावस्य बालस्याख्याहि चेश्वरि[3] ।। २६

वसिष्ठ उवाच :- इति संस्तुतस्तस्य[1] ब्राह्मणस्य सुरेश्वरी ।।
प्रत्यक्षाभून्महीपाल ब्राह्मणं चेदमब्रवीत् ।। २७

देव्युवाच :- वांछितं तव दास्यामि वरंवरय सुव्रत ।।
बालस्य कथयिष्यामि पितरौ च द्विजोत्तम ।। २८

टीप

१ बी प्रत्यक्षा च सुरांगना
२ बी बालस्य पितरावस्य
३ बी प्रसीद द्विजपुत्रस्य बालस्याहि मन्दिरम् ।।

ब्राह्मण उवाच :- आर्यचण्डीति लोकेऽस्मिन् विश्रुता भव चण्डिके ।।
रक्षिका[1] सर्वलोकानां ब्राह्मणानां विशेषत: ।। २९

इह स्थित्वा सदा पाहि विश्वमेतच्चराचरम् ।। ३०

देव्युवाच :- एवमस्तु द्विजश्रेष्ठ बालस्यास्य कुले पुन: ।।
देवताकुलमुख्येषु[2] पूज्या सर्वैरहं सदा ।। ३१

स्थितिमत्र करिष्यामि रक्षणाय शरीरिणाम् ।।
अस्य सोमश्रवा नाम पिता तत्र निवेद्यताम् ।। ३२

वसिष्ठ उवाच :- इत्युक्त्वाऽभूदथादृश्या देवी तत्र नरोत्तम ।।
स द्विजस्तं समादाय पित्रोरर्पितवान् सुतम् ।। ३३

इत्यासीदार्यचण्डीति विख्याता भुवनेश्वरी ।।
नामश्रवणमात्रेण या ददाति वरं नृणाम् ।। ३४

श्रोतव्यमिदमाख्यानं श्रद्धया सततं नरै: ।।
पठितव्यं तथा नित्यं सर्वदु:खोपशान्तये ।। ३५

-0-

इति श्री स्कंदपुराणे एकाशितिसाहस्त्र्यां/संहितायां ब्राह्मविभागे तृतीय परिच्छेदे श्रीमालमाहात्म्ये आर्यचण्डी माहात्म्यं नाम षट्-पंचाशत्तमोऽध्याय: ।। ५६ ।।

१ बी रक्षिणी

२ ए कृष्येषु